This Question Paper consists of 35 questions and 4 Printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

**Sl. No.**

**Roll No.**
**अनुक्रमाङ्कः** | | | | | | | | | | | |

**Code No.**
**गूढसंख्या** **63/S/A**

# SANSKRIT VYAKARAN
# संस्कृतव्याकरणम्
# (246)

**Set /सेट A**

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ____________________

**Signature of Invigilators** 1. ____________________
**(निरीक्षकयोः हस्ताक्षरम्)** 2. ____________________

**सामान्य निर्देशा :**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।
3. वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), वा (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।

# SANSKRIT VYAKARAN
# संस्कृतव्याकरणम्
# (246)

Time : 3 Hours] [Maximum Marks : 100

**परीक्षासमयावधि** : 3 होरात्रयम्] **[पूर्णाङ्का** : 100

**निर्देशाः** (1) अस्मिन् प्रश्नपत्रे **[A]** भागे **10, [B]** भागे **10, [C]** भागे **10, [D]** भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

(2) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (प्रश्नाः × अङ्काः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

(3) **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

**[A] दशानां युक्तं विकल्पं चिनुत ।** **[10 × 1 = 10]**

**1.** इत्संज्ञाविधायकं सूत्रं चिनुत ।

(क) आदिरन्त्येन सहेता (ख) अचोऽन्त्यादि टि

(ग) हलन्त्यम् (घ) गतिश्च

**2.** आभ्यन्तरप्रयत्नस्य कति भेदाः सन्ति ।

(क) दश (ख) पञ्च

(ग) चत्वारः (घ) एकादश

**3.** अयं वर्णः दीर्घः नास्ति ।

(क) ऋ (ख) ऌ

(ग) ए (घ) इ

**4.** अध्वपरिमाणे च इति वार्तिकस्य उदाहरणम् अस्ति ।

(क) गव्यम् (ख) गव्यूतिः

(ग) रमेशः (घ) कृष्णैकत्वम्

**5.** तोः षि इति सूत्रस्य उदाहरणम् अस्ति ।

(क) सन्षष्ठः (ख) सच्चित्

(ग) प्रश्नः (घ) ईट्टे

**6.** पूर्वत्रासिद्धम् इति सूत्रं भवति ।

(क) विधिसूत्रम् (ख) अधिकारसूत्रम्

(ग) नियमसूत्रम् (घ) अतिदेशसूत्रम्

7. ङ्याप्प्रातिपदिकात् इति सूत्रे कति पदानि सन्ति ।

(क) त्रीणि (ख) द्वे

(ग) एकम् (घ) चत्वारि

8. सप्तम्येकवचने सर्वशब्दस्य रूपं भवति ।

(क) सर्वे (ख) सर्वस्मिन्

(ग) सर्वस्मै (घ) सर्वेषाम्

9. सम्बोधने का विभक्तिः भवति ।

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) पञ्चमी

10. अनभिहिते अपादाने का विभक्तिःभवति

(क) प्रथमा (ख) तृतीया

(ग) पञ्चमी (घ) द्वितीया

**[B] दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत ।** **[10 × 2 = 20]**

11. उपसर्गसंज्ञाविधायकं सूत्रं विलिख्य तस्य अर्थं लिखत । [1+1]

12. अनेकाल्शित्सर्वस्य इति परिभाषायाः अर्थं विलिख्य एकं प्रवृत्तिस्थलं लिखन्तु । [1+1]

13. विसर्जनीयस्य सः इति सूत्रस्य अर्थम् उदाहरणं च लिखत । [1+1]

14. अमी इत्यस्य प्रगृह्यसंज्ञाविधायकं सूत्रं विलिख्य तस्य उदाहरणं लिखन्तु । [1+1]

15. स्वादिष्वसर्वनामस्थाने इति सूत्रस्य अर्थं विलिख्य उदाहरणं लिखन्तु । [1+1]

16. उपधासंज्ञाविधायकं सूत्रं विलिख्य तस्य अर्थं लिखन्तु । [1+1]

17. अन्तरान्तरेण युक्ते इति सूत्रस्य अर्थम् उदाहरणं च प्रदर्शयन्तु । [1+1]

18. उक्ते अपादाने का विभक्तिः भवति इति विलिख्य अनुक्ते अपादाने का विभक्तिः भवति इति लिखत । [1+1]

19. गेहे कः इति सूत्रस्य अर्थम् उदाहरणं च विलिखन्तु । [1+1]

20. नन्दनः इत्यत्र अनादेशविधायकं सूत्रं विलिख्य तस्य अर्थं लिखत । [1+1]

**[C] दश अनतिदीर्घोत्तरैः समाधत्त ।** **[10 × 4 = 40]**

21. भूवादयो धातवः, वृद्धिरादैच् इत्यनयोरेकं सूत्रं व्याख्यात ।

22. आदेः परस्य, यू स्त्र्याख्यौ नदी इत्यनयोरेकं सूत्रं व्याख्यात ।

23. हरी एतौ, शम्भू राजते इत्यनयोरेकं रूपं ससूत्रं साधयत ।

24. रामन्नमामि, विष्णोऽव इत्यनयोरेकं रूपं ससूत्रं साधयत ।

25. रमे, विश्वपौ इत्यनयोरेकं रूपं ससूत्रं साधयत ।

26. न विभक्तौ तुस्माः नपुंसकस्य झलचः इत्यनयोरेकं सूत्रं व्याख्यात ।

27. चैत्रः यानेन ग्रामं गच्छति, कृष्णाद् अन्यः रामः अस्ति इत्यनयोः वाक्ययोः कस्यचिदेकस्य सिद्धिं लिखन्तु ।

28. शिवाय बिल्वपत्रं रोचते, विष्णुः दैत्यान् हतवान् इत्यनयोः वाक्ययोः कस्यचिदेकस्य वाक्यस्य सिद्धिं दर्शयन्तु ।

29. मार्ग्यः, कृतवान् इत्यनयोरेकं रूपं ससूत्रं साधयत ।

30. शुषः कः, ऋहलोर्ण्यत् इत्यनयोरेकं सूत्रं व्याख्यात ।

**[D] पञ्च दीर्घोत्तरैः समाधेयाः ।** **[5 × 6 = 30]**

31. मुखनासिकावचनोऽनुनासिकः, यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् इत्यनयोरेकं सूत्रं व्याख्यात ।

32. अतो रोरप्लुतादप्लुते, ससजुषो रुः इत्यनयोरेकं सूत्रं व्याख्यात ।

33. अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, अतोऽम् इत्यनयोरेकं सूत्रं व्याख्यात ।

34. ह्रस्वो नपुंसके प्रातिपदिकस्य, नामि इत्यनयोरेकं सूत्रं व्याख्यात ।

35. यतश्च निर्धारणम्, उपान्वध्याङ्वसः इत्यनयोरेकं सूत्रं व्याख्यात ।

⌘⌘⌘